# सुस्वागत भो ! अरुणाचलेऽस्मिन्

## संस्कृते परिचयः (Introduction)

अरुणाचल प्रदेशस्य एकस्मिन् विद्यालये अद्य उत्सवस्य वातावरणम्। सुसज्जिते प्रवेशद्वारे सुन्दरैः अक्षरैः लिखितम्–**स्वागतम् कुर्मः**। तदैव छात्राणाम् एकः दलः तत्र प्रविशति। तेषां स्वागताय प्रवेशद्वारम् उभयतः स्थितः बालसमूहः मधुरस्वरेण गायति–

**यः सप्तराज्येषु विभासमानः,**
**तरङ्गिणी यत्र च लोहिताख्या।**
**'ईटा' हि यस्यास्ति पुरी प्रधाना,**
**सुस्वागतं भो! अरुणाचलेऽस्मिन्॥**

*(तदैव विद्यालयस्य प्रधानाचार्यः तत्र आगच्छति।)*

**प्रधानाचार्यः** अस्मिन् मनोरमे अरुणाचलप्रदेशे भवतां सर्वेषां हार्दिकं स्वागतम्।

**छात्राः** अनुगृहीताः वयम्। अस्य मनोहरप्रदेशस्य विषये ज्ञातुं समुत्सुकाः स्मः।

**प्रधानाचार्यः** जानामि। एतदर्थमेव सभागारे अस्य प्रदेशस्य मान्यः पर्यटनाधिकारी युष्मान् प्रतीक्षते। आगम्यताम्। तत्र एव चलामः।

## हिंदी अनुवाद (Hindi Translation)

अरुणाचल प्रदेश के एक विद्यालय में आज उत्सव का वातावरण है। सुसज्जित प्रवेशद्वार पर सुन्दर अक्षरों में लिखा हुआ है–स्वागत करते हैं। उसी समय छात्रों का एक दल प्रवेश करता है। उनके स्वागत के लिए प्रवेशद्वार के दोनों ओर स्थित बच्चों का समूह मधुर स्वर में गाता है–

जो सात राज्यों में चमक रहा है और जहाँ पर लोहित नाम की नदी है, जिसकी ईटा नाम की प्रधान नगरी है, अरे! इस अरुणाचल प्रदेश में आपका स्वागत हो।

*(तभी विद्यालय के प्रधानाचार्य वहाँ आ जाते हैं।)*

**प्रधानाचार्य** इस सुन्दर अरुणाचल प्रदेश में आप सबका हार्दिक स्वागत है।

**छात्र** आपने हम पर कृपा की है। इस मनोहर प्रदेश के बारे में जानने के लिए हम उत्सुक हैं।

**प्रधानाचार्य** मैं यह जानता हूँ। इसीलिए सभागार में इस प्रदेश के मान्य पर्यटन अधिकारी आपकी प्रतीक्षा कर रहे हैं। आइए, वहीं चलते हैं।

## अन्वयः (Prose-order)

**यः सप्तराज्येषु विभासमानः,**
**तरङ्गिणी यत्र च लोहिताख्या।**
**'ईटा' हि यस्यास्ति पुरी प्रधाना,**
**सुस्वागतं भो! अरुणाचलेऽस्मिन्॥**

यः *(i)* .................................. विभासमानः यत्र च *(ii)* .................................. तरङ्गिणी। यस्य प्रधाना पुरी *(iii)* .................................. हि अस्ति, भो! अस्मिन् *(iv)* .................................. सुस्वागतम्।

**मञ्जूषा–** लोहिताख्या, सप्तराज्येषु, अरुणाचले, ईटा

**उत्तराणि–**(*i*) सप्तराज्येषु (*ii*) लोहिताख्या (*iii*) ईटा (*iv*) अरुणाचले।

## शब्दार्थाः (Word–meanings Sanskrit to Sanskrit, Hindi and English)

**तरङ्गिणी**–सरिता, नदी (River)। **पुरी**–नगरी, नगर (Town)। **ज्ञातुम्**–ज्ञानाय, जानने के लिए (To know)। **मान्यः**–आदरणीयः, सम्माननीय (Respected)।

## संस्कृते भावार्थः (Summary)

**यः सप्तराज्येषु विभासमानः,**
**तरङ्गिणी यत्र च लोहिताख्या।**
**'ईटा' हि यस्यास्ति पुरी प्रधाना,**
**सुस्वागतं भो! अरुणाचलेऽस्मिन्॥**

**अस्य भावोऽस्ति यत्–**यः प्रदेशः भारतस्य *(i)* .................................. दिशि असममेघालयत्रिपुरामणिपुरादिषु सप्त राज्येषु *(ii)* .................................. (प्रकाशमानः) अस्ति, यत्र च लोहितनाम्नी (ब्रह्मपुत्र) नदी प्रवहति, यस्य च *(iii)* .................................. नगरी 'ईटा' अस्ति। भो (छात्राः) ! अत्र अस्मिन् अरुणाचलनामके प्रदेशे भवताम् सर्वेषाम् *(iv)* .................................. (अभिनन्दनम्) अस्ति।

**मञ्जूषा–** स्वागतम्, विभासमानः, पूर्वस्याम्, प्रमुखा

**उत्तराणि–**(*i*) पूर्वस्याम् (*ii*) विभासमानः (*iii*) प्रमुखा (*iv*) स्वागतम्।

## सन्धि-विच्छेदः (Disjoin Sandhi)

| | | | |
|---|---|---|---|
| अरुणाचलेऽस्मिन् | – अरुणाचले + अस्मिन् (पूर्वरूप सन्धिः)। | तरङ्गिणी | – तरम् + गिणी (परसवर्ण सन्धिः)। |
| लोहिताख्या | – लोहित + आख्या (दीर्घ सन्धिः)। | एतदर्थम् | – एतत् + अर्थम् (जश् सन्धिः)। |
| तदैव | – तदा + एव (वृद्धिः सन्धिः)। | मनोहर | – मनः + हर (विसर्ग सन्धिः)। |
| स्वागतम् | – सु + आगतम् (यण् सन्धिः)। | यस्यास्ति | – यस्य + अस्ति (दीर्घ सन्धिः)। |
| सभागारे | – सभा + आगारे (दीर्घ सन्धिः)। | | |

## समासाः (Compounds)

| | | | |
|---|---|---|---|
| बालसमूहः | – बालानाम् समूहः (षष्ठी तत्पुरुषः)। | प्रधानाचार्यः | – प्रधानः च असौ आचार्यः (कर्मधारयः)। |
| प्रवेशद्वारम् | – प्रवेशाय द्वारम् (चतुर्थी तत्पुरुषः)। | मधुर स्वरेण | – मधुरेण स्वरेण (कर्मधारयः)। |
| अरुणाचलप्रदेशे | – अरुणाचले प्रदेशे (कर्मधारयः)। | सभागारे | – सभायाः आगारे (षष्ठी तत्पुरुषः)। |
| सुन्दरैः अक्षरैः | – सुन्दराक्षरैः (कर्मधारयः)। | | |

## प्रत्ययाः (Suffixes)

| | | | |
|---|---|---|---|
| लिखितम् | – लिख् + क्त। | प्रधाना | – प्रधान + टाप्। |
| हार्दिकम् | – हृद् + ठक्। | विभासमानः | – वि + भास् + शानच्। |
| ज्ञातुम् | – ज्ञै + तुमुन्। | तरङ्गिणी | – तरङ्ग + इन् + ङीप्। |

**प्रश्नाः (Questions)**

**(I) एकपदेन उत्तरत–**

(*i*) 'स्वागतम् कुर्मः' इति कुत्र लिखितम्? (*ii*) के समुत्सुकाः सन्ति?

**(II) पूर्णवाक्येन उत्तरत–**

प्रधानाचार्यः केषाम् स्वागतम् करोति?

**(III) भाषिककार्यम्–**

(*i*) 'अस्य प्रदेशस्य' अत्र विशेषणपदम् किम्?
(क) अस्य (ख) प्रदेशस्य (ग) प्रदेशः (घ) इदम्

(*ii*) 'प्रधाना' पदे कः प्रत्ययः?
(क) आ (ख) ना (ग) टाप् (घ) ङीप्

(*iii*) 'दलः' इति पदस्य पर्यायपदं गद्यांशात् एव चित्वा लिखत।
(क) सेना (ख) चमू (ग) सम्मेलनं (घ) समूहः

(*iv*) 'युष्मान्' इति सर्वनामपदस्य प्रयोगः केभ्यः अभवत्?
(क) शिक्षकेभ्यः (ख) छात्रेभ्यः (ग) अधिकारिभ्यः (घ) अध्यापकेभ्यः

(*v*) 'मनः हरति इति' अस्य स्थाने किं पदं प्रयुक्तम्?
(क) मनःहरः (ख) मनुहरः (ग) मनोहरः (घ) मनहरः

(*vi*) 'सुन्दरैः अक्षरैः' इति अनयोः पदयोः विशेष्यपदं किम्?
(क) सुन्दरः (ख) सुन्दरैः (ग) अक्षर (घ) अक्षरैः

**उत्तराणि–** (I) (*i*) प्रवेशद्वारे (*ii*) छात्राः।
(II) प्रधानाचार्यः छात्राणाम् स्वागतम् करोति।
(III) (*i*) (क) अस्य (*ii*) (ग) टाप् (*iii*) (घ) समूहः (*iv*) (ख) छात्रेभ्यः (बालेभ्यः) (*v*) (ग) मनोहरः (*vi*) (घ) अक्षरैः।

**प्रश्ननिर्माणम्–** (*i*) अद्य विद्यालये **उत्सवस्य** वातावरणं वर्तते।
(*ii*) तत्र **छात्राणाम्** एकः दलः प्रविशति।
(*iii*) अरुणाचलस्य **प्रधाना** पुरी 'ईटा' अस्ति।
(*iv*) सभागारे राज्यस्य पर्यटनाधिकारी **छात्रान्** प्रतीक्षते।
(*v*) अरुणाचलः **सप्तराज्येषु** विभासमानः अस्ति।

**उत्तराणि–**(*i*) कस्य (*ii*) केषाम् (*iii*) कीदृशी (*iv*) कान् (*v*) केषु।

## सुस्वागतं भो! अरुणाचलेऽस्मिन्

**(इस अरुणाचल प्रदेश में आपका स्वागत है।)**

**(1)**

*(विद्यालयस्य सभागारः। मञ्चे विद्यालयस्य प्रधानाचार्यः, प्रदेशस्य पर्यटनाधिकारी, केचित् अध्यापकाः उपविष्टाः सन्ति।)*

**पर्यटनाधिकारी** *(ध्वनिविस्तारकयन्त्रस्य समीपम् आगत्य) प्रियच्छात्राः। अभिनन्दनं भवताम् अस्मिन् प्रदेशे। प्रसीदामि यत् भवन्तः अस्य रम्यस्य प्रदेशस्य विषये ज्ञातुम् अति उत्सुकाः। एतदर्थं स्थलानां दर्शनाय प्रबन्धः अपि वर्तते परन्तु सम्प्रति प्रश्नोत्तरमाध्यमेन भवतां जिज्ञासां शमयितुम् इच्छामि। प्रथमं तु अहम् एव एकं प्रश्नं पृच्छामि। अस्य प्रदेशस्य नाम 'अरुणाचलः' कथं जातम्? अनुमीयताम्।*

**हिमांशुः** *अहं चिन्तयामि यत् 'अरुणः' तु सूर्यस्य पर्यायः। अस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति। अतः अरुणस्य प्रदेशः अरुणाचलः।*

**पर्यटनाधिकारी** *शोभनम्। उचितम् उक्तम्। हिमाद्रितुङ्गैः शृङ्गैः सुशोभिता सूर्योदयभूमिः इयम्। अतः अरुणाचलः। अस्मिन् प्रदेशे पञ्चाशदधिकाः नद्यः प्रवहन्ति। विपुला च अत्र वनसम्पदा। वनौषधीनां तु अयं स्रोतः एव। पुष्पाणां समृद्धिः सुगन्धिः च मनोहरः। सर्वत्र हरीतिमा। शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृतिः एव न विविधा मनोहरा च प्रत्युत संस्कृतिः अपि।*

**सर्वे** *एवम्..........................।*

## हिंदी अनुवाद (Hindi Translation)

**पर्यटनाधिकारी** (विद्यालय का सभागार [Auditorium])। मंच पर विद्यालय के प्राचार्य, प्रदेश के पर्यटनाधिकारी, कुछ अध्यापक बैठे हैं। (लाउडस्पीकर के पास आकर) प्रिय छात्रो! इस प्रदेश में आप सबका स्वागत है। मुझे प्रसन्नता हो रही है कि आप लोग इस मनोहर प्रदेश के बारे में जानने के लिए बड़े उत्सुक हैं। इसके लिए स्थलों के दर्शन के लिए प्रबन्ध भी है परन्तु हम अभी प्रश्नोत्तर माध्यम से आपकी जिज्ञासा शान्त करना चाहते हैं। पहले तो मैं ही एक प्रश्न पूछता हूँ–इस प्रदेश का नाम 'अरुणाचल' कैसे पड़ गया? अनुमान लगाइए।

**हिमांशु** मेरा सोचना है कि अरुण तो सूर्य का समानार्थक है। इसका प्रकाश सबसे पहले इसी प्रदेश का स्पर्श करता है। इसलिए सूर्य का प्रदेश ही अरुणाचल है।

**पर्यटनाधिकारी** शाबाश! ठीक कहा। सूर्योदय की यह भूमि हिमालय की ऊँची चोटियों से सुशोभित है। इसी कारण यह अरुणाचल है। इस प्रदेश में पचास से अधिक नदियाँ बहती हैं और यहाँ की वन-सम्पत्ति भी विशाल है। जंगली जड़ी-बूटियों का तो यह उद्‌गम स्थान है। फूलों की सम्पन्नता और सुगंध मन को हरने वाली है। फलों से युक्त पेड़ मन को रिझाने वाले हैं। सब जगह हरियाली है। शुद्ध पर्यावरण से युक्त इस प्रदेश की केवल प्रकृति ही विविध और मनोहारी नहीं है अपितु संस्कृति भी मनोहारी है।

**सब** ऐसा है.............................।

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**सभागारः**–सभाकक्षः, सभा-भवन (Auditorium)। **पर्यटनाधिकारी**–पर्यटनस्य अधिकारी, पर्यटन अधिकारी (Tourist officer)। **ध्वनिविस्तारकयन्त्रस्य**–ध्वनेः विस्तारकयन्त्रस्य, ध्वनि का विस्तार करने वाला यन्त्र (Loud speaker)। **प्रत्युत**–अव्ययः किन्तु, बल्कि (But, hence)। **हरीतिमा**–हरियाली (Greenery)।

## सन्धि-विच्छेदः (Disjoin Sandhi)

| | | | |
|---|---|---|---|
| प्रधानाचार्यः | – प्रधान + आचार्यः (दीर्घ सन्धिः)। | एतदर्थम् | – एतत् + अर्थम् (जश् सन्धिः)। |
| पञ्चाशदधिकाः | – पञ्चाशत् + अधिकाः (जश् सन्धिः)। | शृङ्गैः | – शृम् + गैः (परसवर्ण सन्धिः)। |
| प्रश्नोत्तर | – प्रश्न + उत्तर (गुण सन्धिः)। | सूर्योदयः | – सूर्य + उदयः (गुण सन्धिः)। |
| प्रियच्छात्राः | – प्रिय + छात्राः (तुगागम सन्धिः)। | | |

## समासाः (Compounds)

| | | | |
|---|---|---|---|
| सभागारः | – सभायै आगारः (चतुर्थी तत्पुरुषः)। | सूर्योदयभूमिः | – सूर्योदयस्य भूमिः (षष्ठी तत्पुरुषः)। |
| अरुणाचलः | – अरुणस्य अचलः (षष्ठी तत्पुरुषः)। | पर्यटनाधिकारी | – पर्यटनस्य अधिकारी (षष्ठी तत्पुरुषः)। |
| रम्यस्य प्रदेशस्य | – रम्यप्रदेशस्य (कर्मधारयः)। | | |

## प्रत्ययाः (Suffixes)

| | | | | | |
|---|---|---|---|---|---|
| विपुला | – विपुल + टाप्। | जातम् | – जन् + क्त। | अभिनन्दनम् | – अभि + नन्द् + ल्युट्। |
| शमयितुम् | – शम् + णिच् + तुमुन्। | शोभनम् | – शुभ् + ल्युट्। | | |
| उपविष्टाः | – उप + विश् + क्त। | ज्ञातुम् | – ज्ञा + तुमुन्। | | |

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) पर्यटनाधिकारी कस्य समीपम् आगत्य वदति?
(*ii*) अरुणाचले कति नद्यः प्रवहन्ति?
(*iii*) कस्य प्रकाशः सर्वप्रथमम् अरुणाचलप्रदेशं स्पृशति?
(*iv*) 'पर्यटनाधिकारी केन माध्यमेन छात्राणाम् जिज्ञासां शमयति?

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) विविधा मनोहरा च का? (*ii*) मञ्चे के के उपविष्टाः सन्ति?

**(III) भाषिककार्यम्–**

(*i*) 'विपुला' पदे कः प्रत्ययः?
(क) आ (ख) टाप् (ग) श (घ) ङीप्

(*ii*) 'इदानीम्' इति अर्थे किं पदं प्रयुक्तम्?
(क) अधुना (ख) अद्य (ग) सम्प्रति (घ) सम्प्रतम्

(*iii*) 'पृच्छामि' इति क्रियायाः कर्तृपदं किम्?
(क) अहम् (ख) त्वम् (ग) यूयम् (घ) वयम्

(*iv*) 'सुशोभिता' इति कस्य पदस्य विशेषणम्।
(क) सूर्योदय कस्य (ख) भूमिः पदस्य (ग) भूमेः (घ) सूर्योदयभूमिः पदस्य

**उत्तराणि–** (I) (*i*) ध्वनि विस्तारकयंत्रस्य (*ii*) पञ्चाशताधिकाः (*iii*) अरुणस्य (*iv*) प्रश्नोत्तरमाध्यमेन।
(II) विविधा मनोहरा च अरुणाचलस्य संस्कृतिः। (*ii*) मञ्चे प्रधानाचार्यः, प्रदेशस्य पर्यटनाधिकारी केचन अध्यापकाः च उपविष्टाः सन्ति।
(III) (*i*) (ख) टाप् (*ii*) (ग) सम्प्रति (*iii*) (क) अहम् (*iv*) (घ) सूर्योदयभूमिः पदस्य।

**प्रश्ननिर्माणम्–** (*i*) मञ्चे **विद्यालयस्य** प्रधानाचार्यः उपविशति।
(*ii*) **अरुणः** तु सूर्यस्यः पर्यायः।
(*iii*) विपुला च अत्र **वन सम्पदा**।
(*iv*) **अस्मिन् प्रदेशे** भवताम् अभिनन्दनम्।

**उत्तराणि–**(*i*) कस्य (*ii*) कः (*iii*) का (*iv*) कुत्र।

**सुधाकरः** अस्य प्रदेशस्य राजधानी का?
**पर्यटनाधिकारी** 'ईटानगरम्' अस्य प्रदेशस्य राजधानी।
**श्यामा** महोदय! अत्रत्य जनजातीनां कानि प्रमुखानि आजीविका-साधनानि?
**पर्यटनाधिकारी** कृषिः शिल्पकला वनसम्पद् चैव एतेषां प्रमुखानि आजीविकासाधनानि।
**रविः** मान्यवर! अस्य प्रदेशस्य प्रमुखाः उत्सवाः के?
**पर्यटनाधिकारी** साधु पृष्टम्। अत्र अनेके प्रमुखोत्सवाः। 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति। एतत् तु 'फरवरी' इति मासे मान्यते। अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च सामाजिकं कार्यं क्रियते। 'मोपीन' इति अपि कृषिपर्व अस्ति। देवानामपि देवः 'मोपीन' इति कथ्यते। 'होली सदृशम् एव पर्व इदम्। जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति। इदम् 'अप्रैल' इति मासे मान्यते। 'ओणम्' पर्व समं 'साडकेन' एकम् अन्यत् पर्व अस्ति। लामासम्प्रदायस्य 'लोसर' इति प्रमुखं पर्व अपि 'फरवरी' इति मासे सम्पद्यते।
**हिमांशुः** अस्माभिः 'मिथुन' इति विषये अपि किञ्चिद् श्रुतम्। किं तत्?

## हिंदी अनुवाद (Hindi Translation)

**सुधाकर** इस प्रदेश की राजधानी कौन-सी है?
**पर्यटनाधिकारी** 'ईटानगर' इस प्रदेश की राजधानी है।
**श्यामा** महोदय! यहाँ जनजातियों के कौन-से प्रमुख आजीविका-साधन हैं।
**पर्यटनाधिकारी** खेती-बाड़ी, शिल्पकला और वन-सम्पत्ति यही इनकी आजीविका के प्रमुख साधन हैं।
**रवि** मान्यवर! इस प्रदेश के प्रमुख उत्सव कौन-से हैं?
**पर्यटनाधिकारी** ठीक पूछा है। यहाँ पर अनेक प्रमुख उत्सव हैं। 'वाङ्चो' जनजातियों का प्रमुख उत्सव 'ओरिया' है। यह फरवरी मास में मनाया जाता है। इस अवसर पर कृषि तथा भूमिपूजन और पुल निर्माण का सामाजिक कार्य किया जाता है। 'मोपीन' भी कृषि उत्सव है। देवताओं का भी देवता मोपीन कहलाता है। यह उत्सव होली के समान ही है। लोग आपस में मुख और मस्तक पर चावलों का आटा लीपते हैं। यह अप्रैल मास में मनाया जाता है। 'ओणम्' पर्व के समान 'साडकेन' नामक एक और पर्व है। लामा सम्प्रदाय का 'लोसर' नामक प्रमुख पर्व भी फरवरी के महीने में मनाया जाता है।
**हिमांशु** हमने 'मिथुन' के बारे में भी कुछ सुना है। वह क्या होता है?

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**शिल्पकला**–हस्तकला, हाथों द्वारा वस्तुएँ बनाने की कला (Handicraft)। **कपोले**–वदनमुभयतः, गाल पर (On the check)। **सम्पद्यते**–मान्यते, मनाया जाता है (Is celebrated)।

## समासाः (Compounds)

राजधानी – राज्ञः धानी (षष्ठी तत्पुरुषः)। कृषिभूमिपूजनम् – कृषिभूम्याः पूजनम् (षष्ठी तत्पुरुषः)।
प्रमुखोत्सवाः – प्रमुखाः उत्सवाः (कर्मधारयः)। कृषिपर्व – कृषेः पर्व (षष्ठी तत्पुरुषः)।
सेतुनिर्माणम् – सेतोः निर्माणम् (षष्ठी तत्पुरुषः)। आजीविका-साधनानि – आजीविकायाः साधनानि (षष्ठी तत्पुरुषः)।

## सन्धि-विच्छेदः (Disjoin Sandhi)

प्रमुखोत्सवाः – प्रमुख + उत्सवाः (गुण सन्धिः)। किञ्चिद् – किम् + चित् (परसवर्ण सन्धिः)।
चैव – च + एव (वृद्धि सन्धिः)। प्रमुखं पर्व – प्रमुखम् + पर्व (अनुस्वार सन्धिः)।

## प्रत्ययाः (Suffixes)

का – किम् (कः) + टाप्। सामाजिकम् – समाज + ठक्।
श्रुतम् – श्रु + क्त। पृष्टम् – पृष् + क्त।

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(i) 'लोसर' कस्य प्रमुखं पर्व? (ii) कृषि भूमिपूजनम् कस्मिन् पर्वणि क्रियते?

**(II) पूर्णवाक्येन उत्तरत–**

(i) जनजातीनां प्रमुखानि आजीविका साधनानि कानि? (ii) मोपीन कः?

**(III) भाषिककार्यम्–**

(i) 'अन्यत् पर्व' अनयोः पदयोः विशेष्यपदम् लिखत।
(क) अन्यः (ख) अन्यत् (ग) पर्व (घ) पर्वः
(ii) 'प्रमुखं पर्व' इत्यनयोः पदयोः विशेषणपदं किम्?
(क) पर्व (ख) प्रमुखं (ग) पर्वः (घ) प्रमुखः
(iii) 'अप्रैल' इति मासे किं पर्व मान्यते?
(क) मोपीन (ख) ओरिया (ग) होली (घ) ओणम्
(iv) 'लिम्पन्ति' इति क्रियायाः कर्तृपदं किम्?
(क) बालकाः (ख) छात्राः (ग) महिलाः (घ) जनाः
(v) 'सम्पद्यते' इति पदस्य पर्यायपदं नाट्यांशात् एव चित्वा लिखत।
(क) मान्यते (ख) क्रियते (ग) सम्मान्यते (घ) अलङ्क्रियते

**उत्तराणि–** (I) (*i*) लामासम्प्रदायस्य (*ii*) ओरियापर्वणि।

(II) जनजातीनां प्रमुखानि आजीविका साधनानि कृषिः, शिल्पकला: वनसम्पद् च सन्ति। (*ii*) देवानाम् अपि देव: मोपीन: अस्ति।

(III) (*i*) (ग) पर्व (*ii*) (ख) प्रमुखं (*iii*) (क) मोपीन (*iv*) (घ) जना: (*v*) (क) मान्यते।

**प्रश्ननिर्माणम्–** (*i*) **'ईटानगरम्'** अस्य प्रदेशस्य राजधानी अस्ति।

(*ii*) 'लोसर' पर्व **फरवरी मासे** मान्यते।

(*iii*) अत्र **अनेके** प्रमुखोत्सवा: मान्यन्ते।

(*iv*) **जना:** परस्परं मुखे कपोले च शालिचूर्णं अस्ति।

**उत्तराणि–**(*i*) किम् (*ii*) कदा (*iii*) कति (*iv*) के।

## (3)

***पर्यटनाधिकारी*** *'मिथुन:' गोमहिषसदृश: एक: विशिष्ट: राजपशु: अस्ति।*

***शोभा*** *वयम् अत्रत्यानाम् ऐतिहासिकस्थलानां विषये ज्ञातुम् इच्छाम:।*

***पर्यटनाधिकारी*** *मया पूर्वम् एव उक्तं यत् अस्य प्रदेशस्य दर्शनीयस्थलानां दर्शनीय विशेष: प्रबन्ध: अपि अस्ति। अधुना तु वयम् अनेन प्रक्षेपकयन्त्रेण केषाञ्चित् स्थलानां परिचयं प्राप्स्याम:। पश्यत एतत् चित्रम्।*

***राजीव*** *किम् एतत् कस्यचित् दुर्गस्य चित्रम्?*

***पर्यटनाधिकारी*** *आम्! एतत् दिवांग-उपत्यका-मण्डले स्थितं भीष्मकनगरदुर्गम्! अस्य अवशेषा: तु आर्यकला-संस्कृति-सम्पद: परिचायका:। अधुना इदं चित्रं पश्यत।*

### हिंदी अनुवाद (Hindi Translation)

**पर्यटनाधिकारी** 'मिथुन'! हाँ। मिथुन! गाय, भैंस के समान एक विशिष्ट राजपशु है।

**शोभा** हम यहाँ के ऐतिहासिक स्थानों के विषय में जानना चाहते हैं।

**पर्यटनाधिकारी** मैंने पहले ही कहा था कि इस स्थान के दर्शनीय स्थानों के दर्शन के लिए विशेष प्रबन्ध भी है। अब तो हम इस प्रक्षेपक यन्त्र से कुछ स्थानों की जानकारी प्राप्त करेंगे। इस चित्र को देखो।

**राजीव** क्या यह किसी दुर्ग का चित्र है?

**पर्यटनाधिकारी** यह भीष्मक नामक किला दिवांग जिले की पहाड़ी तलहटी में स्थित है। इसके खंडहर तो आर्यकला की संस्कृति सम्पत्ति के सूचक हैं। अब इस चित्र को देखें।

### शब्दार्था: (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**गोमहिषसदृश:–**गोमहिषसम:, गाय एवं भैंस के समान (Like cow and buffalo)। **अत्रत्यानाम्–**अस्य / प्रदेशस्य, यहाँ के (Of here)। **प्रक्षेपकयन्त्रेण:–**'प्रक्षेपक' इति नाम यन्त्रेण, प्रक्षेपक यंत्र से (By projector)। **अवशेषा:–**अवशिष्टा:, बचे हुए (Ruins)।

### समासा: (Compounds)

गोमहिषसदृश: – गवाम् महिषाणाम् च सदृश: (षष्ठी तत्पुरुष:)।

आर्यकला – आर्याणाम् कला (षष्ठी तत्पुरुष:) राजपशु: – राज्ञ: पशु: (षष्ठी तत्पुरुष)।

ऐतिहासिकस्थलानाम् – ऐतिहासिकानाम् स्थलानाम् (कर्मधारय)। विशेष: प्रबन्ध: – विशेष प्रबन्ध: (कर्मधारय:)।

### सन्धि-विच्छेद: (Disjoin Sandhi)

केषाञ्चित् – केषाम् + चित् (परसवर्ण सन्धि:)। एतत् चित्रम्– एतच्चित्रम् (श्चुत्व सन्धि:)।

### प्रत्यया: (Suffixes)

ज्ञातुम् – ज्ञा + तुमुन्। स्थितम् – स्था + क्त।

ऐतिहासिक – इतिहास + ठक्। उक्तम् – वच् + क्त।

### प्रश्ना: (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) का ऐतिहासिक स्थलानाम् विषये ज्ञातुम् इच्छति? (*ii*) दुर्गस्य नाम लिखत।

**(II) पूर्णवाक्येन उत्तरत–**

(*i*) मिथुन: क: अस्ति? (*ii*) छात्रा: केन यन्त्रेण स्थलानां परिचयं प्राप्नुवन्ति?

**(III) भाषिककार्यम्–**

(*i*) 'प्रबन्ध:' अस्य विशेषण पदम् किम्?

(क) विशेष: (ख) उत्तम: (ग) विशिष्ट: (घ) साधारण:

(*ii*) 'विशिष्ट: राजपशु:' इति अनयो: विशेष्यपदं किम्?

(क) विशिष्ट: (ख) विशिष्ट (ग) राजपशु: (घ) राजपशु

(*iii*) 'वयम्' इति कर्तृपदस्य क्रियापदम् किम्।

(क) इच्छाम: (ख) इच्छामि (ग) इच्छन्ति (घ) इच्छति

(*iv*) 'पश्यत' इति पदं कस्मिन् लकारे अस्ति?

(क) लट् (ख) लोट् (ग) लृट् (घ) विधिलिङ्

**उत्तराणि–** (I) (*i*) शोभा (*ii*) भीष्मकनगरदुर्गम्।

(II) (*i*) 'मिथुन:' गोमहिषसदृश: एक: विशिष्ट: राजपशु: अस्ति। (*ii*) छात्रा: प्रक्षेपकयन्त्रेण स्थलानां परिचयं प्राप्नुवन्ति।

(III) (*i*) (क) विशेष: (*ii*) (ग) राजपशु: (*iii*) (क) इच्छाम: (*iv*) (ख) लोट्।

**प्रश्ननिर्माणम्–** (*i*) मिथुन: एक: **विशिष्ट:** राजपशु: अस्ति।

(*ii*) अधुना **इदं चित्रं** पश्यत।

(*iii*) वयम् **ऐतिहासिक-स्थलानां** विषये ज्ञातुम इच्छाम:।

**उत्तराणि–**(*i*) कीदृश: (*ii*) किम् (*iii*) केषाम्।

**शैलेश** — *अहं जानामि इदं स्थानम्! इदं तु 'तवाङ्ग गोम्पा' इति प्रसिद्धः बौद्धमठः।*

**पर्यटनाधिकारी** — *सम्यक् अभिज्ञातम्! मनोहरे सुरम्ये 'तवाङ्ग' इति स्थले राजते अयं बौद्धमठः। पञ्चशतानां बौद्धभिक्षूणां निवासयोग्या स्थली इयम्। लोहितजनपदे अपि अनेकबौद्धविहाराः सन्ति।*

**नीलिमा** — *मान्यवर! मया अस्य प्रदेशस्य 'परशुरामकुण्डम्' इति दर्शनीयस्थलविषये अपि पठितम्! किम् इदम्?*

**पर्यटनाधिकारी** — *आम्। एतत् कुण्डम् तु लोहितनद्याः किञ्चिद्दूरे अस्ति। पूर्वम् इदं ब्रह्मकुण्डम् आसीत्। इदं लोहितनद्याः उद्गमस्थलम् इति मन्यते। अत्र अनेकानि अन्यानि दर्शनीयानि स्थलानि अपि सन्ति। अस्माकं पर्यटनविभागेन प्रकाशितां केषाञ्चित् प्रसिद्धस्थलानां सूचीं पठित्वा ज्ञायताम् इमानि पर्यटनस्थलानि–*

## हिंदी अनुवाद (Hindi Translation)

**शैलेश** — मैं इस स्थान के बारे में जानता हूँ। यह 'तवाङ्ग गोम्पा' नामक बौद्धों का प्रसिद्ध मठ है।

**पर्यटनाधिकारी** — तुमने ठीक पहचाना। मनोहर और रमणीय तवाङ्ग स्थान पर यह बौद्धमठ विराजमान है। यह जगह पाँच सौ बौद्ध भिक्षुओं के निवास के योग्य है। लोहित जिले में भी अनेक बौद्ध विहार हैं।

**नीलिमा** — मान्यवर! मैंने इस प्रदेश के परशुराम कुण्ड नामक दर्शनीय स्थल के विषय में पढ़ा है। यह क्या है?

**पर्यटनाधिकारी** — हाँ! यह कुण्ड लोहित नदी से कुछ दूर है। पहले यह ब्रह्मकुण्ड था। यह लोहित नदी का उद्गम स्थल माना जाता है। यहाँ अन्य भी अनेक दर्शनीय स्थल हैं। हमारे पर्यटन विभाग द्वारा प्रकाशित कुछ प्रसिद्ध स्थलों की सूची पढ़कर इन पर्यटन स्थलों का ज्ञान प्राप्त करो–

## शब्दार्थाः (Word-meanings Sanskrit to Sanskrit, Hindi and English)

**उद्गमस्थलम्**–निस्सरण, निकलने का स्थान (Originating place)। **सूची**–सूचनाप्रदात्री, सूची (List)। **कुण्डम्**–कूपः, समर्थ (Well)। **अभिज्ञातम्**–विज्ञातम्, विज्ञातम्, पहचाना (Recognised)।

## समासाः (Compounds)

निवासयोग्य – निवासस्य योग्या (षष्ठी तत्पुरुषः)।
बौद्धमठः – बौद्धानाम् मठः (षष्ठी तत्पुरुषः)
ब्रह्मकुण्डम् – ब्रह्मणः कुण्डम् (षष्ठी तत्पुरुषः)।
उद्गमस्थलम् – उद्गमस्य स्थलम् (षष्ठी तत्पुरुषः)।
दर्शनीयस्थलानि – दर्शनीयानि स्थलानि (कर्मधारयः)।
अनेकबौद्धविहाराः – अनेके बौद्धविहाराः (कर्मधारयः)।

## सन्धि-विच्छेदः (Disjoin Sandhi)

शैलेशः – शैल + ईशः (गुण सन्धिः)।
मनोहरे – मनः + हरे (विसर्ग सन्धिः)।
किञ्चिद्दूरे – किम् + चित् (परसवर्ण सन्धिः) + दूरे (जश् सन्धिः)।
केषाञ्चित् – केषाम् + चित् (परसवर्ण सन्धिः)।

## प्रत्ययाः (Suffixes)

अभिज्ञातम् – अभि + ज्ञा + क्त।
स्थली – स्थल + ङीप्।
दर्शनीय – दृश् + अनीयर्।
निवासयोग्या – निवासयोग्य + टाप्।
पठितम् – पठ् + क्त।
पठित्वा – पठ् + क्त्वा।

## प्रश्नाः (Questions)

**(I) एकपदेन उत्तरत–**

(*i*) कः बौद्धमठः? (*ii*) 'ब्रह्मकुण्डम्' कस्य पूर्वं नाम आसीत्?

**(II) पूर्णवाक्येन उत्तरत–**

लोहितनद्याः उद्गमस्थलम् किम्?

**(III) भाषिककार्यम्–**

(*i*) 'स्थली' अस्य विशेषणपदम् किम्?
(क) इदम् (ख) अयम् (ग) इमाम् (घ) इयम्

(*ii*) 'अत्र' पदम् कस्मै प्रयुक्तम्?
(क) अरुणाचलप्रदेशाय (ख) आसमाय (ग) त्रिपुराय (घ) मेघालयाय

(*iii*) 'अस्य प्रदेशस्य' इति अनयोः पदयोः विशेष्यपदं किम्?
(क) अस्य (ख) प्रदेशस्य (ग) प्रदेशः (घ) अयम्

(*iv*) 'स्थलम्' इति पदस्य पर्यायपदम् अनुच्छेदात् एव चित्वा लिखत।
(क) स्थानम् (ख) स्थली (ग) स्थलीम् (घ) स्थलः

(*v*) 'आसीत्' इति क्रियायाः कर्तृपदं किम्?
(क) पूर्वम् (ख) इदम् (ग) ब्रह्मकुण्डम् (घ) कुण्डम्

**उत्तराणि–** (I) (*i*) तवाङ्ग-गोम्पा (*ii*) परशुरामकुण्डस्य।
(II) लोहितनद्याः उद्गमस्थलम् परशुराम-कुण्डम् मन्यते।
(III) (*i*) (घ) इयम् (*ii*) (क) अरुणाचलप्रदेशाय (*iii*) (ख) प्रदेशस्य (*iv*) (क) स्थानम् (*v*) (ग) ब्रह्मकुण्डम्।

**प्रश्ननिर्माणम्–** (*i*) अहम् **इदं स्थानं** जानामि।
(*ii*) **अयं** बौद्धमठः तवाङ्ग इति स्थले राजते।
(*iii*) **पूर्वम्** इदं ब्रह्मकुण्डम् आसीत्।
(*iv*) एतत् कुण्डम् तु **लोहितनद्याः** किञ्चिददूरे अस्ति।

**उत्तराणि**–(*i*) किम् (*ii*) कः (*iii*) कदा (*iv*) कस्याः।

## (5)

| पर्यटनस्थलम् | स्थानम् |
|---|---|
| 'मालिनीथान' मन्दिरम् | पश्चिमी-सियाङ्ग-मण्डलम् |
| 'भालुकपोङ्ग' उपक्षेत्रम् | पूर्व-कामेङ्ग-मण्डलम् |
| ईटानगरदुर्गम् | ईटा-नगरम् |
| आकाशी गङ्गा | अलोङ्ग-मार्गः |
| चोरतेनस्तूपः | जिमिथाङ्ग-गोलकम् |
| विजयनगरस्तूपः | मियाव-गोलकम् |
| 'ताम्रेश्वरी' मन्दिरम् | लोहित-मण्डलम् |
| शिवलिङ्गगुहा | सुम्बसिरी मण्डलम् |

| अभयारण्यानि |
|---|
| ईटानगर-वन्य-जीव-उद्यानम् |
| पखुई-वन्य-जीव-उद्यानम् |
| इरिङ्ग-स्मारक-वन्य-जीव-उद्यानम् |
| ईगलनेस्ट-वन्य-जीव-उद्यानम् |
| नामदफा-राष्ट्रीय-उद्यानम् |

**सर्वे** अधुना तु वयम् एतानि स्थलानि द्रष्टुम् उत्सुकाः स्मः।

**प्रधानाचार्यः** शोभनम्। एतेषां दर्शनाय सम्पूर्णा व्यवस्था वर्तते। कार्यक्रमस्तु सुनिश्चितः। जलपानाद् अनन्तरं गमिष्यामः।

### हिंदी अनुवाद (Hindi Translation)

| पर्यटनस्थल | स्थान |
|---|---|
| 'मालिनीथान' मन्दिर | पश्चिमी सियांग मण्डल |
| 'भालुकपोङ्ग' उपक्षेत्रम् | पूर्व-कामेंग मण्डल |
| ईटानगर दुर्ग | ईटानगर |
| आकाशी गंगा | अलोंगे मार्ग |
| चोरतेन स्तूप | जिमिथांग गोलक |
| विजयनगर स्तूप | मियाव गोलक |
| 'ताम्रेश्वरी' मन्दिर | लोहित मण्डल |
| शिवलिंग गुहा | सुम्बसिरी मण्डल |

| अभयारण्य |
|---|
| ईटानगर-वन्य-जीव-उद्यान |
| पखुई-वन्य-जीव-उद्यान |
| इरिङ्ग-स्मारक-वन्य-जीव-उद्यान |
| ईगलनेस्ट-वन्य-जीव-उद्यान |
| नामदफा-राष्ट्रीय-उद्यान |

**सब** अब तो हम इन स्थलों को देखने के लिए उत्सुक (इच्छुक) हैं।

**प्रधानाचार्य** ठीक है! इनको देखने के लिए पूरा प्रबन्ध है। कार्यक्रम तो सुनिश्चित है। हम जलपान के बाद जाएँगे।

**सन्धि-विच्छेदः (Disjoin Sandhi)**

कार्यक्रमस्तु – कार्यक्रमः + तु (विसर्ग सन्धिः)। जलपानाद् अनन्तरं – जलपानात् + अनन्तरं (जश् सन्धिः)।

## पाठ्यपुस्तकस्य अभ्यासः
## (अनुप्रयोगः)

**1. एकपदेन उत्तरत (मौखिक-अभ्यासार्थम्)**

(*i*) सूर्योदयभूमिः अरुणाचलः कैः सुशोभिता?

(*ii*) अरुणाचले कति नद्यः वहन्ति?

(*iii*) अरुणाचलस्य पर्यावरणं कीदृशम्?

(*iv*) देवानामपि देवः कः कथ्यते?

(*v*) अरुणाचलस्य राजधानी का?

(*vi*) लामासम्प्रदायस्य प्रमुखं पर्व किम्?

(*vii*) अरुणाचलस्य विशिष्टः राजपशुः कः?

(*viii*) 'तवाङ्ग गोम्पा' केषां मठः?

**उत्तराणि–** (*i*) हिमाद्रितुङ्ग शृङ्गैः (*ii*) पञ्चाशदधिकाः (*iii*) शुद्धम् (*iv*) मोपीनः
(*v*) ईटानगरम् (*vi*) लोसर (*vii*) मिथुनः (*viii*) बौद्धानाम्।

**2. एतेषां प्रश्नानाम् उत्तराणि एकवाक्येन लिख्यन्ताम्–**

(*i*) अरुणः कस्य पर्यायः?

(*ii*) सूर्योदयभूमिः इति पदं कस्मै प्रयुक्तम्?

(*iii*) अरुणाचलप्रदेशस्य जनजातीनां प्रमुखानि आजीविकासाधनानि कानि सन्ति?

(*iv*) 'ओरिया' इति केषां प्रमुखं पर्व?

(*v*) लामासम्प्रदायस्य 'लोसर' इति पर्व कदा मान्यते?

(*vi*) 'मोपीन' इति कीदृशं पर्व अस्ति?

(*vii*) 'ओणम्' इति केषां राज्यवासिनां प्रसिद्धं पर्व?

**उत्तराणि–** (*i*) अरुणः सूर्यस्य पर्यायः।

(*ii*) सूर्योदयभूमिः इति पदम् अरुणाचलाय प्रयुक्तम्।

(*iii*) अरुणाचल प्रदेशस्य जनजातीनां प्रमुखानि आजीविका साधनानि कृषिः, शिल्पकला, वनसम्पद् च सन्ति।

(*iv*) 'ओरिया' इति वाङ्चो जनजातीनां प्रमुखं पर्व।

(*v*) लामासम्प्रदायस्य 'लोसर' इति पर्व फरवरी मासे मान्यते।

(*vi*) 'मोपीन' इति 'होली' सदृशं पर्व अस्ति।

(*vii*) 'ओणम्' इति 'केरल' राज्यवासिनां प्रसिद्धं पर्व।

**3. एतानि वाक्यानि आधृत्य प्रश्ननिर्माणम् क्रियताम्–**

**यथा– कथनम्** – अरुणाचलप्रदेशे **पञ्चाशदधिकाः** नद्यः प्रवहन्ति।

**प्रश्नः** – अरुणाचलप्रदेशे कति नद्यः प्रवहन्ति? **उत्तराणि**

(*i*) **अरुणस्य** प्रदेशः अरुणाचलः। ..............................

(*ii*) **अरुणाचले** अनेके उत्सवाः मान्यन्ते। ..............................

(*iii*) **अरुणाचलप्रदेशस्य** राजधानी ईटानगरम् अस्ति। ..............................

(*iv*) **'ओरिया' इति पर्वणि** अरुणाचले कृषिभूमिपूजनं सामाजिककार्यं च भवति। ..............................

(*v*) **भीष्म-नगर-दुर्गस्य** अवशेषाः आर्य-काल-संस्कृति-सम्पद्-परिचायकाः। ..............................

**उत्तराणि–** (*i*) कस्य (*ii*) कुत्र (*iii*) कस्य (*iv*) कस्मिन्/कदा (*v*) कस्य।

**4. अधोलिखितवाक्येषु स्थूलपदानि केभ्यः प्रयुक्तानि?**

| | |
|---|---|
| **यथा**–अहम् **भवतां** जिज्ञासां शमयितुम् इच्छामि। | **छात्राणां कृते/छात्रेभ्यः** |
| (*i*) प्रथमं तु **अहम्** एव एकं प्रश्नं पृच्छामि। | .................................. |
| (*ii*) सूर्यस्य प्रकाशः सर्वप्रथमम् **इमं** स्पृशति। | .................................. |
| (*iii*) **अहं** चिन्तयामि यत् अरुणः तु सूर्यस्य पर्यायः। | .................................. |
| (*iv*) कृषिः, शिल्पकला, वनसम्पद् च **एतेषां** प्रमुखानि आजीविकासाधनानि। | .................................. |
| (*v*) **इदम्** 'अप्रैल' इति मासे मान्यते। | .................................. |
| (*vi*) अधुना तु वयम् **एतानि** द्रष्टुम् उत्सुकाः स्मः। | .................................. |
| (*vii*) **अत्र** अनेके प्रमुखोत्सवाः। | .................................. |

**उत्तराणि**– (*i*) पर्यटनाधिकारिणे (*ii*) अरुणाचलप्रदेशाय (*iii*) हिमांशवे (*iv*) जनजातिभ्यः (*v*) मोपीन-पर्वणे (*vi*) पर्यटनस्थलेभ्यः (*vii*) अरुणाचलप्रदेशाय।

**5. अत्र लिखिते गद्यांशे रिक्तस्थानानां पूर्तिं 'इदम्' इति सर्वनामपदस्य उचितरूपैः कुरुत–**

अरुणस्य प्रदेशः अरुणाचलः। .................... प्रदेशस्य अस्ति हिमाद्रितुङ्गश्रृङ्गैः सुशोभिता भूमिः। एवञ्च अस्ति विपुलवनसम्पदा .................... प्रदेशे। .................... प्रदेशात् एव वहति लोहिताख्या नदी। सूर्यस्य प्रकाशः सर्वप्रथमम् .................... प्रदेशम् एव स्पृशति। .................... प्रदेशेन एव जीवन्ति .................... प्रदेशस्य जनाः। अद्भुतः सौन्दर्यमयः एव .................... प्रदेशः।

**उत्तराणि**–अस्य, अस्मिन्, अस्मात्, इमम्, अनेन, अस्य, अयम्।

**6. विशेष्यैः सह समुचितविशेषणानि योजयत**

| | **विशेषणानि** | **विशेष्यानि** | **उत्तराणि** |
|---|---|---|---|
| **यथा**– | (*i*) विविधवर्णमनोहरा | (क) पर्व | (*i*) च |
| | (*ii*) प्रमुखानि | (ख) राजपशुः | (*ii*) .................................. |
| | (*iii*) सामाजिकम् | (ग) आजीविकासाधनानि | (*iii*) .................................. |
| | (*iv*) अन्यत् | (घ) ऐतिहासिकस्थलानि | (*iv*) .................................. |
| | (*v*) मनोरमाः | (ङ) कार्यम् | (*v*) .................................. |
| | (*vi*) दर्शनीयानि | (च) प्रकृतिः | (*vi*) .................................. |
| | (*vii*) गोमहिषसदृशः | (छ) फलसमृद्धविटपाः | (*vii*) .................................. |

**उत्तराणि**– (*i*) प्रकृतिः (*ii*) आजीविका-साधनानि (*iii*) कार्यम् (*iv*) पर्व (*v*) फलसमृद्धविटपाः (*vi*) ऐतिहासिकस्थलानि (*vii*) राजपशुः।

## योग्यता-विस्तारः
## (न परीक्षाकृते)

**भावविस्तारः**

**नद्यः** अरुणाचले पञ्चाशदधिकनद्यः प्रवहन्ति। तन्न कमेंग-सुबंसिरी-सियांग-लोहित-दिवाङ्ग-तिरप-नाम्न्यः प्रमुखाः नद्यः। 'ब्रह्मपुत्र' नाम्न्याः नद्याः अपि अत्र उद्गमः। सदियास्थले दिहांग-दिवाङ्ग नद्योः 'लोहिता' इति नद्या सह सङ्गमः एव 'ब्रह्मपुत्र' इति नाम भवति।

**वनसम्पदा** अत्रत्या वनसम्पदा विपुला। अस्य प्रदेशस्य 62 प्रतिशतं भागः वनाच्छादितः। अस्मिन् प्रदेशे विविधवृक्षाणां वनानि सन्ति। क्वचित् तु चीरपर्णः/सरलः देवदारु-अगर-रुद्राक्षवृक्षाणां सघनवनानि सन्ति, क्वचित् सेमल-वालनट-ओक-पाइन-मेकाई-वृक्षाणाम् अरण्यानि। नारंग-आम्ल, कंटघर-अनन्नास-लीची-फलपादपाः प्रचुराः। जाङ्गलाः कदली-फलतरवः तु पर्याप्ताः एव।

**वनौषधयः** अस्मिन् प्रदेशे वनौषधीनां प्राचुर्य वर्तते, येषां चिकित्सायाम् उपयोगः भवति। यथा अकरकरा-ममीरे-अगर-पादपाः बहुलाः। एवमेव कुष्ठः (कृमिनाशकः सर्पदंशहरः), सप्तपर्णः (कृमिनाशकः, कुष्ठघ्नः कफहनः रक्तशोधकश्च)।

| | |
|---|---|
| | अर्जुनः (हृदयरोगे लाभकरः), बहिर्रा (बहेड़ा, कब्जरोगे), हरड़ (कृमिनाशकः), ब्राह्मी (स्मरणशक्ति-वर्धिका), चित्रकं (चर्मरोगे), बिडंगः (रक्तशोधकः), वचा (वातहरः), अगरुः (वातकफनाशकः), नागकेशरः (कफपित्तशामकः), दारु-हरिद्रा (वेदनास्थापनम्)। |
| **मिथुनः धनेशः च** | मिथुनः गो-महिषयोः संकररूपः विशिष्टः पशुः। तस्य अग्रभागः महिषस्य इव पृष्ठः भागः च गो इव भवति। 'धनेशः' च दीर्घचञ्चुचर्चितः विशिष्टः राजपक्षी अस्ति। |
| **जनजातयः** | अरुणाचलः जनजातीनाम् एव प्रदेशः। तत्र माम्मा, मिजी, ऑका, निसी, गोलोंग, डिगारो वाङ्चो प्रमुखाः जनजातयः वसन्ति। |
| **कृषि** | अत्र कृषिः द्विधा भवति–झूमकृषिः जलकृषिः च। पर्वते जङ्गलान् स्वच्छीकृत्य या कृषिः भवति सा झूमकृषिः कथ्यते। उपत्यकासु जलकृषिः भवति। |

**हिंदी अनुवाद (Hindi Translation)–नदियाँ–**अरुणाचल प्रदेश में पचास से अधिक नदियाँ बहती हैं। वहाँ कमेंग, सुबंसिरी, सियांग-लोहित-दिवांग-तिरप नामक प्रमुख नदियाँ हैं। ब्रह्मपुत्र नदी का उद्गम स्थान भी यहीं है। सदिया स्थल पर दिहांग और दिवांग नदियों का लोहित नदी के साथ संगम ही 'ब्रह्मपुत्र' है।

**वन सम्पदा–**यहाँ विस्तृत वन हैं। इस प्रदेश का 62 प्रतिशत भाग वनों से ढँका हुआ है। इस प्रदेश में अनेक वृक्षों के वन हैं। कहीं चीड़, देवदार, अगर, रुद्राक्ष वृक्षों के घने वन हैं तो कहीं सेमल-वालनट-ओक-पाइन-मेकाई वृक्षों के जंगल हैं। संतरे, आँवला, कंटघर, अनन्नास, लीची आदि फलों के वृक्ष बहुत हैं। जंगली केले के वृक्ष तो बहुत ही हैं।

**जंगली जड़ी-बूटियाँ–**इस प्रदेश में जंगली जड़ी-बूटियों की अधिकता है, जिनका चिकित्सा में उपयोग होता है। जैसे अगर के वृक्ष बहुत हैं। इसी प्रकार कुष्ठ (कीड़े मारने वाली, साँप के जहर को दूर करने के लिए), सप्तपर्ण (कीड़े नाशक, कुष्ठ तथा कफ नाशक तथा खून साफ करने वाली), अर्जुन (हृदय रोग में लाभदायक), बहेड़ा (कब्ज से लिए), हरड़ (पेट के कीड़े नष्ट करने वाली), ब्राह्मी (स्मरणशक्ति बढ़ाने वाली), चित्रक (त्वचा सम्बन्धी रोगों में), बिडंग (खून साफ करने वाला), वचा (वात दोष का नाशक), अगरु (वात-कफ नाशक), नागकेशर (कफ तथा पित्त को शांत करने वाला), दारु-हरिद्रा (वेदनास्थापन)।

**मिथुन और धनेश–**मिथुन गाय और भैंस का संकर रूप एक विशिष्ट पशु है। इसके आगे का भाग भैंस के समान व पीछे का भाग गाय के समान होता है।

**धनेश–**लम्बी चोंच वाला प्रसिद्ध राजपक्षी है।

**जनजातियाँ–**अरुणाचल प्रदेश जनजातियों का प्रदेश है। वहाँ माम्मा, मिजी, ऑका, निसी, गोलोंग, वाङ्चो आदि प्रमुख जनजातियाँ निवास करती हैं।

**खेती–**यहाँ दो तरह की खेती होती है। झूम कृषि और जल कृषि। पर्वत पर जंगलों को साफ करके जो खेती होती है वह झूम कृषि कहलाती है तथा घाटियों में जल कृषि होती है।

**दर्शनीयस्थानानि** अधः 'क' स्तम्भे दर्शनीयस्थानानि 'ख' स्तम्भे च तेषां मण्डलानां नामानि। एतानि ध्यानेन पठत अवगच्छत च।

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| (*i*) मालिनी स्थानम् | (*i*) पश्चिमी सियांगे स्थितम् |
| (*ii*) भीष्मकनगर-दुर्गम् | (*ii*) लोहितमण्डले स्थितम् |
| (*iii*) शिवलिङ्गगुहा | (*iii*) निम्नतर-सुबंसिरी मण्डले स्थितम् |
| (*iv*) 'नामदफ़ा' इति राष्ट्रिय-उद्यानम् | (*iv*) चाङ्गलाङ्गमण्डले स्थितम् |
| (*v*) तवाङ्गगोम्पा | (*v*) तवाङ्गमण्डले स्थितम् |

**भावविस्तारः**

**1. अधः कानिचित् पदानि दत्तानि। तेषां प्रकृतयः गोलाकारेषु प्रत्ययाः च चतुर्भुजेषु लिखिताः। ध्यानेन पठत पदानां परिचयं च प्राप्नुत**

पृष्टम् = (प्रच्छ्) [क्त]

आगत्य = (आ + गम्) [ल्यप्]

ज्ञातुम् = (ज्ञा) [तुमुन्]

द्रष्टुम् = (दृश्) [तुमुन्]

दर्शनीयानि = (दृश्) [अनीयर्]

जात: = (जन्) [क्त]

अभिज्ञातम् = (अभि + ज्ञा) [क्त]

प्रसिद्धा: = (प्र + सिध्) [क्त]

पठित्वा = (पठ्) [क्त्वा]

**2. पर्वन् ( त्योहार ) नपुंसकलिङ्गे**

| | **एकवचने** | **द्विवचने** | **बहुवचने** |
|---|---|---|---|
| प्रथमा | पर्व | पर्वणी | पर्वाणि |
| द्वितीया | पर्व | पर्वणी | पर्वाणि |
| तृतीया | पर्वणा | पर्वभ्याम् | पर्वभि: |
| चतुर्थी | पर्वणे | पर्वभ्याम् | पर्वभ्य: |
| पञ्चमी | पर्वण: | पर्वभ्याम् | पर्वभ्य: |
| षष्ठी | पर्वण: | पर्वणो: | पर्वणाम् |
| सप्तमी | पर्वणि | पर्वणो: | पर्वसु |
| सम्बोधने | हे पर्व, हे पर्वन् | हे पर्वणी | हे पर्वाणि |

**अनुरूपशब्दा:**–कर्मन् (काम), शर्मन् (सुख), वर्मन् (कवच), जन्मन् (जन्म), वर्त्मन् (रास्ता), ब्रह्मन् (ब्रह्मा), चर्मन् (चमड़ा)।

## परीक्षोपयोगी अन्य महत्त्वपूर्ण प्रश्नोत्तराणि

**1. ( अ ) अधोलिखितं नाट्यांश पठित्वा प्रश्नान् उत्तरत–** **5**

**पर्यटनाधिकारी–** (ध्वनिविस्तारकयन्त्रस्य समीपम् आगत्य) प्रियच्छात्रा:। अभिनन्दनं भवताम् अस्मिन् प्रदेशे। प्रसीदामि यत् भवन्त: अस्य रमस्य प्रदेशस्य विषये ज्ञातुम् अति उत्सुका:। एतदर्थं दर्शनाय प्रबन्ध: अपि वर्तते परन्तु सम्प्रति प्रश्नोत्तरमाध्यमेन भवतां जिज्ञासां शमयितुम् इच्छामि। प्रथमं तु अहम् एव एकं प्रश्नं पृच्छामि। अस्य प्रदेशस्य नाम 'अरुणाचल:' कथं जातम्? अनुमीयताम्।

**हिमांशु:** – अहं चिन्तयामि यत् 'अरुण:' तु सूर्यस्य पर्याय:। अस्य प्रकाश: सर्वप्रथमम् इमं प्रदेशं स्पृशति। अत: अरुणस्य प्रदेश: अरुणाचल:।

**पर्यटनाधिकारी–** शोभनम्! उचितम् उक्तम्। हिमाद्रितु: सुशोभिता सूर्योदयभूमि: इयम्। अत: अरुणाचल:। अस्मिन् प्रदेशे पञ्चाशदधिका: नद्य: प्रवहन्ति। विपुला च अत्र वनसम्पदा। वनौषधीनां तु अयं स्रोत: एव। पुष्पाणां समृद्धि: सुगन्धि: च मनोहर:। सर्वत्र हरीतिमा। शुद्धपर्यावरणेन युक्तस्य अस्य प्रदेशस्य केवलं प्रकृति: एव न विविधा मनोहरा च प्रत्युत संस्कृति: अपि।

**I. एकपदेन उत्तरत–** **½ × 4 = 2**

(*i*) के अरुणाचल-प्रदेशस्य विषये ज्ञातुम् उत्सुका: आसन्?

(*ii*) अस्मिन् प्रदेशे कति नद्य: वहन्ति?

(*iii*) अरुणाचल-प्रदेशस्य भूमिः कैः सुशोभिता?
(*iv*) पर्यटनाधिकारी केन माध्यमेन छात्राणां जिज्ञासां शाम्यति?

**II. पूर्णवाक्येन उत्तरत–** $1 \times 1 = 1$

अयं प्रदेशः किमर्थम् अरुणाचलः कथ्यते?

**III. भाषिककार्यम्–** $\frac{1}{2} \times 4 = 2$

(*i*) 'विपुला च अत्र वनसम्पदा' अत्र 'वनसम्पदा' इति पदस्य विशेषणपदं किम् अस्ति?
(क) अत्र (ख) च (ग) विपुला (घ) विपुलः

(*ii*) 'अभिनन्दनं भवताम् अस्मिन् प्रदेशे' अत्र 'भवताम्' सर्वनामपदं केभ्यः प्रयुक्तम्?
(क) छात्रेभ्यः (ख) शिक्षकेभ्यः (ग) बालेभ्यः (घ) कन्याभ्यः

(*iii*) केन अव्ययपदेन वाक्यद्वयं योजितम् अस्ति?
(क) अपि (ख) प्रत्युत (ग) च (घ) एव

(*iv*) संवादे 'पृच्छामि' इति क्रियापदस्य कर्तृपदं किम्?
(क) एकं (ख) प्रश्नं (ग) प्रथमं (घ) अहम्

**उत्तराणि–** I. (*i*) छात्राः (*ii*) पञ्चाशदधिकाः (*iii*) हिमाद्रितुङ्गशृङ्गैः (*iv*) प्रश्नोत्तरमाध्यमेन

II. अरुणः सूर्यस्यः पर्यायः। अरुणस्य प्रकाशः सर्वप्रथमम् इमं प्रदेशं स्पृशति अतः अरुणस्य प्रदेशः अरुणाचलः।

III. (*i*) (ग) विपुला (*ii*) (क) छात्रेभ्यः (*iii*) (ख) प्रत्युत (*iv*) (घ) अहम्

**(आ) अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत–** 5

**पर्यटनाधिकारी** 'ईटानगरम्' अस्य प्रदेशस्य राजधानी।
**श्यामा** महोदय! अत्रत्यजनजातीनां कानि प्रमुखानि आजीविका-साधनानि?
**पर्यटनाधिकारी** कृषिः शिल्पकला वनसम्पद् चैव एतेषां प्रमुखानि आजीविकासाधनानि।
**रविः** मान्यवर! अस्य प्रदेशस्य प्रमुखाः उत्सवाः के?
**पर्यटनाधिकारी** साधु पृष्टम्। अत्र अनेके प्रमुखोत्सवाः। 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति। एतत् तु 'फरवरी' इति मासे मान्यते। अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च सामाजिकं कार्यं क्रियते। 'मोपीन' इति अपि कृषिपर्व अस्ति। देवानामपि देवः 'मोपीन' इति कथ्यते। 'होली सदृशम् एव पर्व इदम्।' जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति। इदम् 'अप्रैल' इति मासे मान्यते। 'ओणम्' पर्वसमं 'साडकेन' एकम् अन्यत् पर्व अस्ति। लामासम्प्रदायस्य 'लोसर' इति प्रमुखं पर्व अपि 'फरवरी' इति मासे सम्पद्यते।
**हिमांशुः** अस्माभिः 'मिथुन' इति विषये अपि किञ्चिद् श्रुतम्। किं तत्?
**पर्यटनाधिकारी** 'मिथुनः' गोमहिषसदृशः एकः विशिष्टः राजपशुः अस्ति।

**I. एकपदेन उत्तरत–** $\frac{1}{2} \times 4 = 2$

(*i*) अरुणाचलस्य राजधानी का?
(*ii*) 'ओणम्' पर्वं सदृशम् अन्यत् पर्व किम् अस्ति?
(*iii*) अरुणाचलस्य प्रमुखः राजपशुः कः अस्ति?
(*iv*) 'मोपीन' इति पर्वणि जनाः परस्परम् किम् लिम्पन्ति?

**II. पूर्णवाक्येन उत्तरत–** $1 \times 1 = 1$

वाङ्चो जनजातीनां ओरियाप्रमुखपर्वणः अवसरे किं किं क्रियते?

**III. यथानिर्देशम् उत्तरत–** $\frac{1}{2} \times 4 = 2$

(*i*) लामासम्प्रदायस्य 'लोसर' इति प्रमुखं पर्व' अत्र 'पर्व' इति पदस्य विशेषणपदं चित्वा लिखत।
(क) प्रमुखम् (ख) लोसर (ग) सम्प्रदायस्य (घ) लामा

(*ii*) 'कृषिः शिल्पकला वनसम्पद् चैव एतेषां प्रमुखानि आजीविकासाधनानि' अस्मिन् **वाक्ये** 'एतेषाम्' सर्वनामपदं केभ्यः प्रयुक्तम्?
(क) जनेभ्यः (ख) जातिभ्यः (ग) जनजातिभ्यः (घ) पुरुषेभ्यः

(*iii*) 'उत्सव:' इति शब्दस्य किं पर्याय शब्द: अत्र प्रयुक्त:?

(क) समारोह (ख) पर्व (ग) पर्वणि (घ) पर्वाणि

(*iv*) 'सम्पन्नम् भवति' अस्मिन् अर्थे किं क्रियापदम् अत्र प्रयुक्तम् अस्ति?

(क) समाप्यते (ख) समापयति (ग) संवत्स्यते (घ) सम्पद्यते

**उत्तराणि–** I. (*i*) ईटानगरम् (*ii*) साडकेन (*iii*) मिथुन: (*iv*) शालिचूर्णम्

II. वाङ्चो जनजातीनां ओरिया प्रमुखपर्वण: अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च सामाजिकं कार्यं क्रियते।

III. (*i*) (क) प्रमुखम् (*ii*) (ग) जनजातिभ्य: (*iii*) (ख) पर्व (*iv*) (घ) सम्पद्यते

**2. अधोलिखितानि वाक्यानि घटनाक्रमानुसारम् पुन: लिखत–** ½ × 8 = 4

(*i*) प्रथमं प्रधानाचार्य: आगतानां सर्वेषां छात्राणां स्वागतं करोति।

(*ii*) सभागारे पर्यटनाधिकारी तेषाम् अभिनन्दनं करोति।

(*iii*) एकस्य विद्यालयस्य छात्राणां दल: अरुणाचलप्रदेशे भ्रमणार्थम् आगच्छति।

(*iv*) एतानि स्थलानि द्रष्टुम् उत्सुका: छात्रा: जलपानं कृत्वा व्यवस्थानुसारं प्रस्थानं कुर्वन्ति।

(*v*) अरुणाचलप्रदेशस्य एक: विद्यालय: तेषां स्वागतार्थे सुसज्जित: क्रियते।

(*vi*) तदा स: सर्वान् छात्रान् विद्यालयस्य सभागारे आगन्तुं कथयति।

(*vii*) स: पृच्छति, अस्य प्रदेशस्य नाम अरुणाचल: कथं जातम्?

(*viii*) एवं पर्यटनाधिकारी प्रश्नोत्तरमाध्यमेन एव अरुणाचलप्रदेशस्य जनजातीनाम्, ऐतिहासिकदर्शनीयस्थलानां विषये च सूचयति।

**उत्तराणि–** (*i*) एकस्य विद्यालयस्य छात्राणां दल: अरुणाचलप्रदेशे भ्रमणार्थम् आगच्छति।

(*ii*) अरुणाचलप्रदेशस्य एक: विद्यालय: तेषां स्वागतार्थे सुसज्जित: क्रियते।

(*iii*) प्रथमं प्रधानाचार्य: आगतानां सर्वेषां छात्राणां स्वागतं करोति।

(*iv*) तदा स: सर्वान् छात्रान् विद्यालयस्य सभागारे आगन्तुं कथयति।

(*v*) सभागारे पर्यटनाधिकारी तेषाम् अभिनन्दनं करोति।

(*vi*) स: पृच्छति, अस्य प्रदेशस्य नाम अरुणाचल: कथं जातम्?

(*vii*) एवं पर्यटनाधिकारी प्रश्नोत्तरमाध्यमेन एव अरुणाचलप्रदेशस्य जनजातीनाम्, ऐतिहासिकदर्शनीयस्थलानां विषये च सूचयति।

(*viii*) एतानि स्थलानि द्रष्टुम् उत्सुका: छात्रा: जलपानं कृत्वा व्यवस्थानुसारं प्रस्थानं कुर्वन्ति।

**3. अधोलिखितश्लोकयो: अन्वयम् मञ्जूषाया: उचितपदक्रमेण पूरयत–** ½ × 4 = 2

**य: सप्तराज्येषु विभासमान:, तरंगिणी यत्र च लोहिताख्या।**
**'ईटा' हि यस्यास्ति पुरी प्रधाना, सुस्वागतं भो! अरुणाचलेऽस्मिन्॥**

**अन्वय:–** य: सप्तराज्येषु (*i*) ......................, यत्र च लोहिताख्या (*ii*) ......................, यस्य प्रधाना पुरी (*iii*) ...................... हि अस्ति। भो! अस्मिन् (*iv*) ...................... सुस्वागतम् (अस्तु)।

**मञ्जूषा–** तरंगिणी, विभासमान:, अरुणाचले, ईटा

**उत्तराणि–** (*i*) विभासमान: (*ii*) तरंगिणी (*iii*) ईटा (*iv*) अरुणाचले

**4. अधोलिखितकथनेषु रेखाङ्कितपदानि आधृत्य उदाहरणानुसारं प्रश्न-निर्माणं कुरुत–** 1 × 5 = 5

(*i*) 'ईटानगरम्' अरुणाचलप्रदेशस्य राजधानी।

(*ii*) अस्मिन् प्रदेशे पञ्चाशदधिका: नद्य: प्रवहन्ति।

(*iii*) ईटानगरम् अरुणाचलप्रदेशस्य राजधानी।

(*iv*) हिमाद्रितुङ्गशृङ्गै: सुशोभिता भूमि: इयम्।

(*v*) सूर्यस्य प्रकाश: सर्वप्रथमं अरुणाचल-प्रदेशं स्पृशति।

**उत्तराणि–** (*i*) कस्य? (*ii*) कति? (*iii*) किम्? (*iv*) कै:? (*v*) कम्?

**5. अधोलिखितपंक्तिषु रेखाङ्कितपदानां प्रसंगानुसारं शुद्धम् अर्थं चिनुत–** 1 × 3 = 3

(*i*) तरङ्गिणी च यत्र लोहिताख्या।

(क) तिरंगा (ख) तरन्ति (ग) नदी (घ) तडाग:

(*ii*) अरुणस्य प्रदेश: एव अरुणाचल:।

(क) रक्तवर्णस्य (ख) सूर्यस्य (ग) चन्द्रमस: (घ) चन्द्रस्य

(*iii*) सम्यक् अभिजातम्।

(क) सुचारुरूपेण (ख) शनै:शनै: (ग) शीघ्रमेव (घ) शान्त्या

**उत्तराणि–** (*i*) (ग) नदी (*ii*) (ख) सूर्यस्य (*iii*) (क) सुचारुरूपेण।

**6. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं पुन: उत्तरपुस्तिकायां लिखत–** ½ × 8 = 4

(*i*) प्रधानाचार्य: आगतानां छात्राणां स्वागतं करोति।

(*ii*) पर्यटनाधिकारी प्रश्नोत्तरमाध्यमेन अरुणाचलस्य जनजातीनां दर्शनीयस्थलानां च विषये सूचयति।

(*iii*) छात्रदल: अरुणाचले भ्रमणार्थम् आगच्छति।

(*iv*) छात्रा: जलपानं कृत्वा भ्रमणाय प्रस्थानं करिष्यन्ति।

(*v*) सभागारे पर्यटनाधिकारी तेषाम् अभिनन्दनं करोति।

(*vi*) तेषां स्वागतार्थम् एक: विद्यालय: सुसज्जित: अस्ति।

(*vii*) तदा स: छात्रान् विद्यालयस्य सभागारे आगन्तुं कथयति।

(*viii*) स: पृच्छति–अस्य प्रदेशस्य नाम 'अरुणाचल:' इति कथं जातम्?

**उत्तराणि–** (*i*) छात्रदल: अरुणाचले भ्रमणार्थम् आगच्छति।

(*ii*) तेषां स्वागतार्थम् एक: विद्यालय: सुसज्जित: अस्ति।

(*iii*) प्रधानाचार्य: आगतानां छात्राणां स्वागतं करोति।

(*iv*) तदा स: छात्रान् विद्यालयस्य सभागारे आगन्तुं कथयति।

(*v*) सभागारे पर्यटनाधिकारी तेषाम् अभिनन्दनं करोति।

(*vi*) स: पृच्छति-अस्य प्रदेशस्य नाम 'अरुणाचल:' इति कथं जातम्?

(*vii*) पर्यटनाधिकारी प्रश्नोत्तरमाध्यमेन अरुणाचलस्य जनजातीनां दर्शनीयस्थलानां च विषये सूचयति।

(*viii*) छात्रा: जलपानं कृत्वा भ्रमणाय प्रस्थानं करिष्यन्ति।

**7. अधोलिखितासु पंक्तिषु रेखाङ्कितपदानां प्रसङ्गानुसारं शुद्धम् अर्थं चित्वा उत्तरपुस्तिकायां लिखत–** $1 \times 3 = 3$

**(अ)** लोहितजनपदे अपि अनेके बौद्धविहारा: सन्ति।

(*i*) रक्तवर्णीयमण्डले (*ii*) ब्रह्मपुत्रनदी जनपदे (*iii*) लोहपूर्ण जनपदे (*iv*) रक्तस्य स्थाने

**(आ)** अस्य अवशेषा: तु आर्यकलासंस्कृति: इति सम्पद: परिचायका:।

(*i*) सम्पत्तय: (*ii*) सम्पत्ते: (*iii*) सम्पत्तीनाम् (*iv*) सम्मत:

**(इ)** सम्यक् अभिज्ञातम्।

(*i*) समानरूपेण (*ii*) वस्तुत: (*iii*) सुष्ठुरूपेण (*iv*) श्रेष्ठ:

**उत्तराणि**–(अ) (*i*) रक्तवर्णीयमण्डले (आ) (*ii*) सम्पत्ते: (इ) (*iii*) सुष्ठुरूपेण

**8. अधोलिखितानां पदानाम् समुचितं विपर्ययं चित्वा लिखत–** $1 \times 7 = 7$

| **(क) शब्दा:** | **(ख) विपर्यया:** |
|---|---|
| (1) शोकस्य | (*i*) सम्पद: |
| (2) अप्रधाना | (*ii*) समृद्धि: |
| (3) विपद: | (*iii*) स्वागतं |
| (4) विनाश: | (*iv*) उत्सवस्य |
| (5) तिरस्कारं | (*v*) विरामस्थलम् |
| (6) तम: | (*vi*) प्रकाश: |
| (7) उद्गमस्थलम् | (*vii*) प्रधाना |

**उत्तराणि**– (1) (*iv*) उत्सवस्य (2) (*vii*) प्रधाना (3) (*i*) सम्पद: (4) (*ii*) समृद्धि:
(5) (*iii*) स्वागतं (6) (*vi*) प्रकाश: (7) (*v*) विरामस्थलम्।

## मूल्यपरक प्रश्ना: (VBQs)

**वाक्यानि पठित्वा वाक्याधारितान् प्रश्नाम् उत्तरत–**

**प्रश्ना:** (*i*) 'सुस्वागतं भो! अरुणाचलेऽस्मिन्।' अत्र केषां सुस्वागतम् अरुणाचले क्रियते?

(*ii*) 'वनौषधीनां तु अयं स्त्रोत: एव।' इति वाक्ये कस्य प्रदेशस्य चर्चा अस्ति?

(*iii*) 'अस्य अवशेषा: तु आर्यकला-संस्कृति:-संपद: परिचायका:।' अरुणाचले भीष्मकनगर दुर्ग: केषां कला-संस्कृति-संपद परिचायक: वर्तते?

(*iv*) 'पूर्वं तु इदं ब्रह्मकुण्डम् आसीत्।' अत्र अरूणाचलस्य कस्य कुण्डस्य वर्णनम् अस्ति?

(*v*) 'पञ्चशतानां बौद्धभिक्षूणां निवासयोग्या स्थली इयम्।' अत्र कस्य स्थलस्य वर्णनम् अस्ति?

**उत्तराणि**– (*i*) छात्राणाम् (*ii*) अरुणाचलस्य (*iii*) आर्याणाम् (*iv*) परशुरामकुण्डस्य
(*v*) तवाङ्ग गोम्पा मठस्य